## अध्याय :- ६६ * Chapter-66



सूत उवाच ।।

तत्रस्त्रयोदशे वर्षे व्यतीते समये तदा ।।
उपप्लवे संगतेषु सर्वराजसु पांडवाः ।। १

योद्धुमागत्य संतस्थुः कुरुक्षेत्रे महारथाः[१] ।।
कौरवाश्चापि संतस्थुर्दुर्योधनपुरोगमाः ।। २

ततो भीष्मेण प्रोक्तां च नरैः श्रुत्वा युधिष्ठिरः ।।
रथातिरथसंख्यां तु राज्ञां मध्ये वचो ब्रवीत् ।। ३

भीष्मेण विहिता कृष्ण रथातिरथवर्णना ।।
ततो दुर्योधनोऽपृच्छदिदं स्वीयान्महारथान् ।। ४

स सैन्यान्पांडवानेतान्हन्यात्कालेन केनकः ।।
मासेन तु प्रतिज्ञातं भीष्मेण च कृपेण च ।। ५

पक्षं द्रोणेन चाह्नां च दशभिर्द्रौणिना रणे ।।
षड्भिःकर्णेन[२] च तथा सदा मम भयंकृता ।। ६

तदहं स्वांश्च पृच्छामि केन कालेन हंतिकः ।।
एतच्छ्रुत्वा वचो राज्ञः फाल्गुनो वाक्यम ब्रवीत् ।। ७

---

* In the M.S.S.'A' the folio No.358 is the last folio. It is badly damage and torn-up from all side.

The last chapter (66) is missing from the M.S.S.=A

१ ब. था

२ ब. कर्णेन

अयुक्तमेतद्भीष्माद्यैः प्रतिज्ञातं युधिष्ठिर ।।
ततो जये च विजये निश्चयो हि मृषैव तत् ।। ८

तवापिये संति नृपाः सन्नद्धा रणसंस्थिताः ।।
पश्यैतान्पुरुषव्याघ्रान्कालकल्पान्दुरासदान् ।। ९

द्रुपदं च विराटं च धृष्टकेतुं च केकयम् ।।
सहदेवं सात्यकिं च चेकितानं च दुर्जयम् ।। १०

धृष्टद्युम्नं सपुत्रं च महावीर्यं घटोत्कचम् ।।
भीमादींश्च महेष्वासान्केशवं चापराजितम् ।। ११

[१]मन्येहमेकस्त्वेषां हन्यात्कौरववाहिनीम् ।।
सन्नद्धाः प्रतिद्रक्ष्यंति भीष्माद्या बहवो रथाः[२] ।। १२

तेभ्यो भयं न कार्यं ते फल्गवोऽमी मृगा इव ।। १३

अस्माकं धनुषां घोषैरिदानीमेव भारत ।।
कौरवा विद्रविष्यंति सिंहत्रस्ता मृगा इव ।। १४

---

१ ब. मान्ये
२ ब. रथा

वृद्धाद्भिष्माद्द्विजाद्वृद्धाद्द्रोणादपि कृपादपि ।।
बालि शाक्तं भयं द्रौणेः सूतपुत्राच्चदुर्मतेः ।। १५

अथवा चित्तनिर्वृत्यै ज्ञातुमिच्छसि भारत ।।
शत्रूणां प्रत्यनीकेषु[1] संधावच्छृणु मे वचः[2] ।। १६

एकोऽहमेव संग्रामे सर्वे तिष्ठंतु ते रथाः ।।
एकाह्ना क्षपये सर्वान्कौरवान्सैन्यसंयुतान् ।। १७

इत्यर्जुन वचः श्रुत्वा स्मयन्दामोदरोऽब्रवीत् ।।
एवमेतद्यथा प्राह फाल्गुनोऽयं मृषा न तत् ।। १८

ततश्च[3] शंखान्भेरीश्च शतशश्चैव पुष्करान् ।।
निवार्य राजमध्यस्थो बर्बरीको वचोऽब्रवीत् ।। १९

येन तप्तं गुप्तक्षेत्रे येन देव्यः सुतोषिताः[4] ।।
यस्यातुलं बाहुबलं तेन चोक्तं निशाम्यताम् ।। २०

यद्ब्रवीमि वचः सत्यं शृणुध्वं तन्नराधिपाः ।।
आत्मनो वीर्यसदृशं केवलं न तु दर्पतः ।। २१

---

१ ब. प्रत्यानिकेषु
२ ब. वच
३ ब. ततः
४ ब. तः

यदार्जुनेण प्रतिज्ञातमर्जुनेन महात्मना ।।
न मर्षयामि तद्वाक्यं कालक्षेपो महानयम् ।। २२

सर्वे भवंतस्तिष्ठंतु सार्जुनाः सह केशवाः ।।
एको मुहूर्तादि्भीष्मादीन्सर्वान्नेष्ये यमक्षयम् ।। २३

मयि तिष्ठति केनापि शस्त्रं ग्राह्यं न क्षत्रियैः[१] ।।
[२]स्वधर्मशपथो कृत्वा वो स्तुमृते ग्राह्यं ततो मयि ।। २४

पश्यध्वं मे बलं बाहुवीर्यं व्याराधन् संभवम् ।।
माहात्म्यं गुप्तक्षेत्रस्य तथा भक्तिं च पांडुषु ।। २५

पश्यध्वं मे धनुर्घोरं तूणीरावक्षयौ तथा ।।
खड्गं च देव्या युद्धं ततो वच्मि वचस्त्विदम् ।। २६

इति तस्य वचः श्रुत्वा क्षत्रिया विस्मयं ययुः ।।
अर्जुनश्च कटाक्षेपे लज्जितः कृष्णमैक्षत ।। २७

तमाह ललितं कृष्णः[३] फाल्गुनं परमं वचः ।।
आत्मौपयिकमेवेदं भैमिपुत्रो भ्यभाषत ।। २८

---

१ ब. क्षत्रिया
२ ब. स धर्म
३ ब. कृष्णा

नवकोटियुतो नेन पलाशी निहतः पुरा ।।
क्षणादेव च पाताले श्रूयते महदद्भूतम् ।। २९

पुनः प्रक्ष्यामहेत्त्वैर्न केनोपायेन कौरवान् ।।
मुहूर्तार्द्धसि ब्रहीति पृच्छ्यतां चाह तं जयः ।। ३०

ततः स्मयन्यादवेंद्रो भैमिपुत्रम भाषत ।। ३१

भीष्म द्रोण कृप द्रौणि कर्ण दुर्योधनादि भिः ।।
गुप्तां त्र्यंबकदुर्जेयां सेनां हंसि[१] कथं क्षणात् ।। ३२

अयं महान्विस्मयस्ते वचसो भैमिनंदन ।।
संभूतः सर्वराज्ञां च फाल्गुनस्य च धीमतः ।। ३३

तद्ब्रूहि केनोपायेन मुहूर्तार्द्धसि कौरवान् ।।
उपायवीर्यं ते ज्ञात्वा मंस्यामो वयमच्युत ।। ३४

सूत उवाच ।।
इत्युक्तो वासुदेवेन सर्वभूतेश्वरेण च ।।
सिंहवक्षाः[२] पर्वताभो नानाभूषणभूषितः ।। ३५

---

१ ब. हंसि
२ ब. ~~सिंहवृक्षा~~ सिंहवृक्षा

घटास्यो घटहासश्च ऊर्ध्वकेशो ऽतिदीप्तिमान् ।।
विद्युदक्षो वायुजवो यश्चैच्छन्नाशमेज्जगत् ।। ३६

देवीदत्तातुलबलो बर्बरीको ऽभ्य भाषत ।।
यदि वो मानसं वीरा उपायस्य प्रदर्शने ।। ३७

तदहं दर्शयाम्येष पश्यध्वं सहकेशवाः ।।
इत्युक्तवा धनुरारोप्य संदधे विशिखं त्वरन् ।।
निः[१] शल्यं चापि[२] संपूर्णं सिंदूराभेण भस्मना ।। ३८

आकर्णमाकृष्य च तं मुमोच मुखादथोद्भूतमभूच्च भस्म ।। ३९

सेनाद्वये तच्च पपात शीघ्रं यस्यैव यत्रास्ति च मृत्युमर्म ।।
सर्वे रोमसु भीष्मस्य[३] कंठे राधेय द्रोणयोः ।। ४०

ऊरौ[४] दुर्योधनस्यापि शल्यस्यापि च वक्षसि ।।
कंठे च शकुनेर्दीप्तं भगदत्तस्य चापतत् ।। ४१

कृष्णस्य पादतल लके कंठे द्रुपद्मत्स्ययोः ।।
शिखंडिनस्तथा कर्ण्यां कंठे सेनापतेस्तथा ।। ४२

---

१ ब. नि
२ ब. चामि
३ ब. या
४ ब. ऊरो

पपात रक्तं तद्भस्म यत्र येषां च मर्म च ।।
केवलं चैव[1] पांडूनां कृपद्रौण्योश्च नास्पृशत् ।। ४३

इति कृत्वा ततो भूयो बर्बरीकोऽभ्यभाषत ।।
द्रष्टं भवद्भिरेवं यन्मया मर्म निरीक्षितम् ।। ४४

अधुना पातयिष्यामि मर्मस्वेषां शितांछरान् ।।
देवीदत्तानमोघाख्यान्यैर्मरिष्यंत्यमी क्षणात् ।। ४५

शपथा वः स्वधर्मस्य शस्त्रं ग्राह्यं न वः क्वचित् ।।
मुहूर्तात्पातयिष्यामि शत्रूनेतान्छितैः शरैः ।। ४६

ततो विस्मितचितानां युधिष्ठिरपुरोगिणाम् ।।
आसीन्निनादः सुमहान्साधु साध्विति शंसताम् ।। ४७

वासुदेवश्च संक्रुद्धश्चक्रेण निशितेन च ।।
एवं ब्रुवत एवास्य[2] शिरश्छित्वा न्यपातयत् ।। ४८

ततः क्षणात्सर्वमासीदाविग्नं राजमंडलम् ।।
व्यलोकयन्केशवं ते विस्मिताश्चाभवन्भृशम् ।। ४९

---

१ ब. 'पंच' इतिस्यात् ।
२ ब. एकास्य

*१ किमेतदिति प्राहुश्च बर्बरीकः कुतो हतः ।।
पांडवाश्चापि मुमुचुरश्रूणि सहपार्थिवाः ।। ५०

हाहा पुत्रेति च गुणान्प्रस्खलंश्च पदे पदे।।
घटोत्कचोऽपतदीनः पुत्रोपरि विमूर्छितः[२] ।। ५१

एतस्मिन्नंतरे देव्यश्चतुर्दश समाययुः ।। ५२

सिद्धांबिका क्रोडमाता कपाली तारा सुवर्णा च त्रिलोकमैत्री ।।
भाणेश्वरी चर्चिका [३]चैक्वीरा योगेश्वरी चंडिका त्रैपुरा च ।। ५३

भूतांबिका हरसिद्धिस्तथामूः संप्राप्य तस्थुर्नृपविस्मयंकराः ।।
श्रीचंडिकाऽस्यास्य ततो घटोत्कचं प्रोवाच वाक्यं महता स्वरेण ।। ५४

श्रृणुध्वं पार्थिवाः सर्वे कृष्णेन विदितात्मना ।।
हेतुना येन निहतो बर्बरीको महाबलः ।। ५५

मेरुमूर्ध्नि पुरा पृथ्वी समवेतान्दिवौकसः ।।
भाराक्रांता जगादैतान्भारोऽपह्रियतां हि मे ।। ५६

---

*१ किमेत..... हतः ।। ब. प्रतौ इत्ययं श्लोकः नास्ति ।।
२ ब. ताः
३ ब. वै

ततो ब्रह्मा प्राह विष्णु[१] भगवंस्त्वमिदं शृणु ।।
देवास्त्वानुगमिष्यंति भारं हर भुवः प्रभो ।। ५७

ततस्तथेति तन्मेने वचनं विष्णुरव्ययः ।।
एतस्मिन्नंतरे बाहुमुद्धृत्योच्चैर भाषत ।। ५८

सूर्यवर्चेति यक्षोद्र्श्च ऽतुरा शीति कोटिपः ।।
किमर्थं मानुषे लोके भवद्भिर्जन्म कार्यते ।। ५९

मयि तिष्ठति दोषाणामनेकानां महास्पदे ।।
सर्वे भवंतो मोदंतु स्वर्गेषु सह विष्णुना ।। ६०

अहमेकोऽवतीर्यैतान्हनिष्यामि भुवो भरान् ।।
स्वधर्मऽशपथा वो वै संति चेज्जन्म प्राप्स्यथ ।। ६१

इत्युक्तऽवचने ब्रह्मा क्रुद्धस्तं समभाषत ।।
दुर्मते सर्वदेवानाम विषह्यं महाभरम् ।। ६२

स्वसाध्यं ब्रूषे[२] मोहात्त्वं शापयोग्योऽसि बालिश ।।
देश कालोचितं स्वीयं परस्य च बलं त्वदा ।। ६३

---

१ ब. विष्णुः
२ ब. ब्रूषि
३ ब. दश कालोद्भितं

अविचार्यैव प्रमुष्य वक्ति सोऽर्हति दंडनम् ॥
तस्माद्भूभार हरणे युद्धस्योपक्रमे सति ॥ ६४

शरीर नाशं कृष्णात्त्वमवाप्स्यसि न संशयः ॥
एवं शप्तो ब्रह्मणाऽसौ विष्णुमितदयाचत ॥ ६५

यद्येवं भविता नाशस्तदेकं देव प्रार्थये ॥
जन्मप्रभृति मे देहि मतिं सर्वार्थ-साधनीम् ॥ ६६

ततस्तथेति तं प्राह केशवो देव संसदि ॥
शिरस्ते पूजयिष्यंति देव्याः पूज्यो भविष्यसि[१] ॥ ६७

इत्युक्तवा चावतीर्णोऽसौ सह देवैर्हरिस्तदा ॥
हरिर्नाम स कृष्णोऽसौ भवंतस्ते तथा सुराः ॥ ६८

सूर्यवर्चाः स चायं हि निहतो भैमि-पुत्रकः ॥
प्राक्छापं ब्रह्मणाः स्मृत्वा हतोनेन महात्मना ॥
तस्माद्दोषो न कृष्णोऽस्मिन्द्रष्टव्यः सर्व भूमिपैः ॥ ६९

श्री-कृष्ण उवाच ॥[२]
यदुक्तं भूमिपा देव्या तत्तथैव न संशयः ॥ ७०

---

१ ब. ति
२ ब. श्री भगवानु० ॥

मद्येन मधुना नैव हन्यो ब्रह्मवचोऽन्यथा ।।
ततो भवेदिति स्मृत्वा मयासौ विनिपातितः ।। ७१

गुप्तक्षेत्रे मयैवाऽसौ नियुक्तो देव्यनुस्मृतौ ।।
पूर्वं दत्तं वरं स्वीयं स्मरता देवसंसदि ।। ७२

इत्युक्ते चंडिका देवी तदा[1] भक्तशिरस्त्विदम्[2] ।।
अभ्युक्ष्य सुधया शीघ्रमजरं चामरं व्यधात् ।। ७३

यथा [struck out] राहु शिरस्तद्वत्तच्छिरः प्रणनाम तान् ।।
उवाच च यिदक्षामि युद्धं तदनुमन्यताम् ।। ७४

ततः कृष्णो वचः प्राह मेघगंभीर वाक्प्रभुः ।।
यावन्मही सनक्षत्रा यावच्चंद्र दिवाकरौ ।। ७५

तावत्त्वं सर्वलोकानां वत्स पूज्यो भविष्यसि ।।
देवीलोकेषु सर्वेषु देवीवद्विचरिष्यसि ।। ७६

स्वभक्तानां च लोकेषु देवीनां दास्यसे स्थितिम् ।।
बालानां ये भविष्यंति वातपित्तकफोद्भवाः ।।
पिटकास्ताः सुखेनैव शामयिष्यसि पूजनात् ।। ७७

---

१ ब. प्राह
२ ब. देवभक्ति

इदं च शृंगमारुह्य पश्य युद्धं यथा भवेत् ।। ७८

धावंतः कौरवास्त्वस्मान्वयं यामस्त्वमूनिति ।।
इत्युक्ते वासुदेवेन देव्यो/थांबरमाविशन् ।। ७९

बर्बरीक शिरश्चैव गिरिशृंगमवाप्य तत् ।।
देहस्य भूमिसंस्कारश्चाभविच्छिरसो नहि[1] ।।
ततो युद्धं महदभूत्कुरुपांडवसेनयोः ।। ८०

अष्टादशाहिन[2] हता ये च द्रोणवृषादयः ।।
दुर्योधने हते क्रूरे अष्टादशदिनात्यये ।। ८१

युधिष्ठिरो ज्ञातिमध्ये गोविंदं समभाषत ।।
पुरुषोत्तम संग्राममर्मुं संतारिता वयम् ।। ८२

त्वयैव नाथेन हरे नमस्ते पुरुषोत्तम ।।
श्रुत्वा तस्यापि सासूयमिदं भीमो वचो/ब्रवीत् ।। ८३

येन ध्वस्ता धार्तराष्ट्रास्तं निराकृत्य मां नृप ।।
पुरुषोत्तमं कृष्णमिति ब्रवीषि किमु मूढवत् ।। ८४

---

१ ब. प्रती 'मूर्धतः' इति स्यात् ।
२ ब. अष्टादशनिर्हि

धृष्टद्युम्नं फाल्गुनं च सात्यकिं मां च पांडव[1] ।।
निराकृत्य ब्रवीष्येव सूतं धिकत्वां युधिष्ठिरं ।। ८५

अर्जुन उवाच ।।
मैवं मैवं ब्रूहि भीम न त्वं वेत्सि जनार्दनम् ।।
न मया न त्वया पार्थ नान्येनाप्यरयो हताः ।। ८६

अहं हि सर्वदाग्रस्थं नरं पश्यामि संयुगे ।।
निघ्नंतुं शात्रवांस्तत्र न जाने कोऽप्य साविति ।। ८७

भीम उवाच ।।
विभ्रांतोऽसि ध्रुवं पार्थ नात्र हंता नरोऽपरः ।।
अथ चेदस्ति त्वत्पौत्रमुच्चस्थंवच्मि हंतकः ।। ८८

उपसृत्य ततो भीमो बर्बरीकम पृच्छत ।।
ब्रूह्येते केन निहता धार्तराष्ट्रा हि शत्रवः ।। ८९

बर्बरीक उवाच ।।
एको[2] मया पुमान्द्रष्टो युध्यमानः परैः सह ।।
सव्यतः पंचवक्त्रः स दक्षिणे चैकवक्त्रतः ।। ९०

सव्यतो दशहस्तश्च धृतशूलाद्युदायुधः ।।
दक्षिणो[3] च चतुर्हस्तो धृतचक्राद्युदायुधः ।। ९१

---

१ ब. पांडवाः
२ ब. नुको
३ ब. दक्षिणा

सव्यतश्च जटाधारी दक्षिणे मुकुटोच्चयः ।।
सव्यतो भस्मधारी च दक्षिणे धृत चंदनः ।। ९२

सव्यतश्चंद्रधारी च दक्षिणे कौस्तुभद्युतिः ।।
ममापि तद्दर्शनतो महद्भयम जायत ।। ९३

ईदशो मे नरो दृष्टो न चान्यो यो [1]जधान तान् ।।
इत्युक्ते पुष्पवर्षं तु खादासीत्सुमहाप्रभम् ।। ९४

सस्वनुर्देववाद्यानि साधु साध्विति वै जगुः ।।
विस्मिताः[2] पांडवाश्चासन्प्रणेमुः पुरुषोत्तमम् ।। ९५

विलक्षश्चाभवद्भीमो निश्वासांश्चाप्यमुंचत ।।
तं ततः केशवः[3] स्वामी समादाय करे दृढे ।। ९६

कुरुशार्दूल एहीति प्रोच्य सस्मार काश्यपिम् ।।
आरुह्य गरुडं पश्चात्स्मुतमात्रमुप स्थितम् ।। ९७

भीमेन सहितो व्योम्नि प्रयातो दक्षिणां दिशम् ।।
ततोऽर्णं वमतीत्यैव सुवेलं च महागिरिम् ।। ९८

---

१ ब. जधानता ।।
२ ब. ता
३ ब. केशव

लंका समीपे द्रष्ट्वैव सरः कृष्णोऽब्रवीद्वचः ।।
कुरुशार्दूल पश्येदं सरो द्वादशयोजनम् ।। ९९

यदि शूरोऽसि तच्छीघ्र मानयास्यतलान्मृदम् ।।
इत्युक्तो गरुडोच्छीघ्रं न्यपतत्तज्जले बली[१] ।। १००

योजनं वायुजवाद्गच्छन्नधो नांतम पश्यत ।।
ततो भीमो विनिःसृत्य भग्नवीर्योऽभ्य भाषत ।। १०१

अगाधमेतत्सुमहत्सरः कैश्चिन्महाबलैः ।।
अहं खादितुमारब्धः कथंचिच्चापि निर्गतः ।। १०२

एवमुक्तो हसन्कृष्ण उच्चिक्षेप महत्सरः ।।
स्वेनांगुष्ठेन तेजस्वी तदद्भुतम जायत ।। १०३

तद्दृष्ट्वा विस्मितः प्राह किमिदं कृष्ण ब्रूहि मे ।। १०४

श्रीकृष्ण उवाच ।।[२]
कुम्भकर्ण इति ख्यातः पूर्वमासीन्निशाचरः ।।
रामबाणहतस्याभुच्छिरश्छिन्नं सुदुर्मतेः ।। १०५

---

१ ब. बलि
२ ब. श्री भगवानुवाच ।।

शिरसस्तस्य तालुक्यखंडमेतद्वृकोदर ।।
योजनद्वादशायामं मृदु क्षिप्तं विचूर्णितम् ।। १०६

विधृतस्त्वं च येस्ते तु सरोगेयाभिधाः सुराः ।।
त्रिकूटस्य शिलाभिश्च चूर्णिता ये च कोटिशः ।। १०७

ऐते हि विश्वरिपवो निहताः स्युरुपायतः ।।
गच्छामः[१] पांडवान्भीम द्रौणिर्हि त्वरते द्रढम् ।। १०८

ततो भीमः[२] प्रणम्याह मनोवाक्कायबुद्धिभिः ।।
कृतमाजन्मतः सर्वं कुकृतं क्षम केशव ।। १०९

पुरुषोत्तम भवान्नाथ बालिशस्य प्रसिद्ध मे ।।
ततः क्षांतमिति प्रोच्य भीमेन सहितो हरिः ।। ११०

रणाजिरं भूय एत्य बर्बरीकं वचोऽब्रवीत् ।।
वरन्नेवं सुत्ददय सर्वलोकैश्च नित्यशः ।। १११

पूजितः सर्वलोकैस्त्वं यच्छंस्तेषां वरान्वृतान् ।।
गुप्तक्षेत्रं च न त्याज्यं सर्वं क्षेत्रोत्तमोत्तमम् ।। ११२

---

१ ब. म
२ ब. म

देहिस्थल्यां तथा वासी[१] क्षमस्व दुष्कृतं च यत् ।।
इत्युक्त स्तान्नमस्कृत्य भैमिः स्वैरं ययौ मुदा[२] ।।
वासुदेवो/पि कार्याणि सर्वाण्यूर्ध्वमकारयत् ।। ११३

इति वो वर्णितोत्पत्तिर्बर्बरीकस्य वाडवाः ।।
स्तवं चास्य प्रवक्ष्यामि येन तुष्यति यक्षराट् ।। ११४

जय जय चतुरशीति कोटि[३] परिवार
सूर्यवर्चाभिधान यक्षराज जयभूभार हरण
जय काम कटंकटाकुक्षिराजहंस जय घटोत्कच ।।
[४]श्री गुप्त क्षेत्रदे वीस माराधन प्राप्तातुलवीर्य जय
विजय सिद्धिदायक जय पिंगलारेपलेन्द्र
जय श्री कृष्णाबरलब्ध सर्ववर प्रदान सामर्थ्य
जय जय कलिकालवंदित नमोनमस्ते पाहिपाहीति ।। ११५

वैशाखे च त्रयोदश्यां कृष्णपक्षे द्विजोत्तमाः ।।
शतदीपैः पूरिकाभिः संस्तवैत्तस्य तुष्यति ।। ११६

---

१ ब. वासः
२ ब. 'सदा' इति स्यात् ।
३ ब. सूर्य परिवार
४ ब. गुप्तक्षेत्र

ततो विप्रा नारदश्च समाराध्य महेश्वरम् ।।
महीनगरके पुण्ये स्थापयामास शंकरम् ।। ११७

लोकानां च हितार्थाय केदारं लिङ्गमुत्तमम् ।।
अत्रीशादुत्तरे भागे महापापप्रणाशनम् ।। ११८

अत्र कुंडे नरः स्नात्वा श्राद्धं कृत्वा यथाविधि[१] ।।
अत्रीशं च नमस्कृत्य केदारं च प्रपश्यति ।। ११९

मातुः[२] स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाग्भवेत् ।।
ततो रुद्रो नीलकंठो नारदाय महात्मने[३] ।। १२०

वरं दत्त्वा स्वयं तस्थौ महीनगरके शुभे ।।
कोटितीर्थे नरः स्नात्वा नीलकंठं प्रपश्यति ।। १२१

जयादित्यं नमस्कृत्य[४] रुद्रलोकमवाप्नुयात् ।।
जयादित्यं पूजयंति[५] कूपे स्नात्वा नरोत्तमाः ।। १२२

न तेषां वंशनाशोऽस्ति जयादित्य प्रसादतः ।।
तेषां कुले न रोगः स्यान्न दारिद्र्यं न लांछनम् ।। १२३

---

१ ब. विधिः
२ ब. मातु
३ ब. ना
४ ब. यं
५ ब. प्रयंति

पुत्र-पौत्र-समायुक्ता धनधान्य-समायुताः[१] ।।
भुक्त्वा भोगानिह बहून्सूर्यलोके वसन्ति ते ।। १२४

इति प्रोक्तं मया विप्रा गुप्तक्षेत्रं समासतः ।।
सप्तकोश प्रमाणं च क्षेत्रस्यास्य पुरा द्विजाः[२] ।।
स्वयं भुवा प्रोक्तमिदं सर्वकामार्थ सिद्धिदम् ।। १२५

इति वो वर्णितः पुण्यो महीसागर-सम्भवः ।।
श्रृण्वन्संकीर्तयंश्चैवं सर्वपापैः प्रमुच्यते ।। १२६

य इदं श्रावयेद्विद्वान्महामाहात्म्य[३]मुत्तमम् ।।
[४]सर्व-पाप-विनिर्मुक्तो रुद्रलोकं स गच्छति ।। १२७

गुप्तक्षेत्रस्य माहात्म्यं सकलं श्रावयेद्यदि ।।
सर्वैश्वर्यमवाप्नोति ब्रह्महत्यां व्यपोहति ।। १२८

कोटितीर्थस्य माहात्म्यं महीनगरकस्य च ।।
श्रृणोति श्रावयेद्यस्तु ब्रह्मभूयाय कल्पते ।। १२९

कोटितीर्थे नरः[५] स्नात्वा श्राद्धं कृत्वा प्रयत्नतः ।।
दानं दद्याद्यथाशक्तया श्रृणुध्वं तत्फलं हि मे ।। १३०

---

१ ब. तः
२ ब. द्विजः
३ ब. संभवं ।।
४ ब. सर्वथा पतिनिर्मुक्तो
५ ब. नर

स्वर्गपातालमर्त्येषु यानि तीर्थानि सन्ति वै ।।
तेषु दानेषु यत्पुण्यं तत्फलं प्राप्यते नरैः ।। १३१

अश्वमेधादिभिर्यज्ञैरिष्टैश्चैवाप्त दक्षिणैः ।।
सर्वव्रततपोभिश्च कृतैर्यत्पुण्यमाप्यते ।। १३२

तत्पुण्यं प्राप्यते[1] विप्राः[2] कोटितीर्थे न संशयः ।। १३३

इदं पवित्रं खलु पुण्यदं सदा यशस्करं पापहरं परात्परम् ।।
श्रृणोति भक्तया पुरुषः स पुण्यभागसुक्षयं रुद्रस लोकतां व्रजेत ।। १३४

धन्यं यशस्यं नियतं सुपण्यं सर्वमोक्षदं पापहरं नराणाम् ।।
श्रृणोति नित्यं नियतः शुचिः पुमान्भित्वा रविं विष्णुपदं प्रयाति।। १३५

*३ इति श्री स्कांदे..... गुप्तक्षेत्र माहात्म्ये परिन्तर्गतो द्वितीयः
कौमारिकाखंडः समाप्तः।।
मुलखंड ।।१।। अंतर्गतखंडः(२)
ॐ नमः शिवायः ||

---

१ ब. जायते

२ ब. विप्रा

*३ ब. इति श्री स्कंद पुराणे कुमारिकाखंडे गुप्तक्षेत्र महात्म्ये सप्तषट्शोऽध्यायः ।।६७।।

इति श्री स्कंदपुराणे द्वितीय खंडः समाप्तः| शुभं भवतु|संवत १८९० क्रोधिनाम संवत्सरे अषाढकृष्ण प्रतिपदायां भौमवारे समापितं ।

श्री कृष्णार्पणमस्तु ।।

श्री सांब सदाशिवार्पणमस्तु ।।

श्री रामचन्द्र प्रसन् ।।